॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय २४

सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी ।
आससादाशु वैदेहीं प्रियां प्रणयिनी सखी ॥ १॥

सा हि तत्र कृता मित्रं सीतया रक्ष्यमाणया ।
रक्षन्ती रावणादिष्टा सानुक्रोशा दृढव्रता ॥ २॥

सा ददर्श सखीं सीतां सरमा नष्टचेतनाम् ।
उपावृत्योत्थितां ध्वस्तां वडवामिव पांसुषु ॥ ३॥

तां समाश्वासयामास सखी स्नेहेन सुव्रता ।
उक्ता यद्रावणेन त्वं प्रत्युक्तं च स्वयं त्वया ॥ ४॥

सखीस्नेहेन तद्वीरु मया सर्वं प्रतिश्रुतम् ।
लीनया गनहे शून्ये भयमुत्सृज्य रावणात् ।
तव हेतोर्विशालाक्षि न हि मे जीवितं प्रियम् ॥ ५॥

स सम्भ्रान्तश्च निष्क्रान्तो यत्कृते राक्षसाधिपः ।
तच्च मे विदितं सर्वमभिनिष्क्रम्य मैथिलि ॥ ६॥

न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः ।
वधश्च पुरुषव्याघ्रे तस्मिन्नेवोपपद्यते ॥ ७॥

न चैव वानरा हन्तुं शक्याः पादपयोधिनः ।
सुरा देवर्षभेणेव रामेण हि सुरक्षिताः ॥ ८॥

दीर्घवृत्तभुजः श्रीमान्महोरस्कः प्रतापवान् ।
धन्वी संहननोपेतो धर्मात्मा भुवि विश्रुतः ॥ ९॥

विक्रान्तो रक्षिता नित्यमात्मनश् च परस्य च ।
लक्ष्मणेन सह भ्रात्रा कुशली नयशास्त्रवित् ॥ १०॥

हन्ता परबलौघानामचिन्त्यबलपौरुषः ।
न हतो राघवः श्रीमान्सीते शत्रुनिबर्हणः ॥ ११॥

अयुक्तबुद्धिकृत्येन सर्वभूतविरोधिना ।
इयं प्रयुक्ता रौद्रेण माया मायाविदा त्वयि ॥ १२॥

शोकस्ते विगतः सर्वः कल्याणं त्वाम् उपस्थितम् ।
ध्रुवं त्वां भजते लक्ष्मीः प्रियं प्रीतिकरं शृणु ॥ १३॥

उत्तीर्य सागरं रामः सह वानरसेनया ।
संनिविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ॥ १४॥

दृष्टो मे परिपूर्णार्थः काकुत्स्थः सहलक्ष्मणः ।
सहितैः सागरान्तस्थैर्बलैस्तिष्ठति रक्षितः ॥ १५॥

अनेन प्रेषिता ये च राक्षसा लघुविक्रमः ।
राघवस्तीर्ण इत्येवं प्रवृत्तिस्तैरिहाहृता ॥ १६॥

स तां श्रुत्वा विशालाक्षि प्रवृत्तिं राक्षसाधिपः ।
एष मन्त्रयते सर्वैः सचिवैः सह रावणः ॥ १७॥

इति ब्रुवाणा सरमा राक्षसी सीतया सह ।
सर्वोद्योगेन सैन्यानां शब्दं शुश्राव भैरवम् ॥ १८॥

दण्डनिर्घातवादिन्याः श्रुत्वा भेर्या महास्वनम् ।
उवाच सरमा सीतामिदं मधुरभाषिणी ॥ १९॥

संनाहजननी ह्येषा भैरवा भीरु भेरिका ।
भेरीनादं च गम्भीरं शृणु तोयदनिस्वनम् ॥ २०॥

कल्प्यन्ते मत्तमातङ्गा युज्यन्ते रथवाजिनः ।
तत्र तत्र च संनद्धाः सम्पतन्ति पदातयः ॥ २१॥

आपूर्यन्ते राजमार्गाः सैन्यैरद्भुतदर्शनैः ।
वेगवद्भिर्नदद्भिश्च तोयौघैरिव सागरः ॥ २२॥

शास्त्राणां च प्रसन्नानां चर्मणां वर्मणां तथा ।
रथवाजिगजानां च भूषितानां च रक्षसाम् ॥ २३॥

प्रभां विसृजतां पश्य नानावर्णां समुत्थिताम् ।
वनं निर्दहतो धर्मे यथारूपं विभावसोः ॥ २४॥

घण्टानां शृणु निर्घोषं रथानां शृणु निस्वनम् ।
हयानां हेषमाणानां शृणु तूर्यध्वनिं यथा ॥ २५॥

उद्यतायुधहस्तानां राक्षसेन्द्रानुयायिनाम् ।

सम्भ्रमो रक्षसामेष तुमुलो लोमहर्षणः ॥ २६ ॥

श्रीस्त्वां भजति शोकघ्नी रक्षसां भयमागतम् ।
रामात्कमलपत्राक्षि दैत्यानामिव वासवात् ॥ २७ ॥

अवजित्य जितक्रोधस्तमचिन्त्यपराक्रमः ।
रावणं समरे हत्वा भर्ता त्वाधिगमिष्यति ॥ २८ ॥

विक्रमिष्यति रक्षःसु भर्ता ते सहलक्ष्मणः ।
यथा शत्रुषु शत्रुघ्नो विष्णुना सह वासवः ॥ २९ ॥

आगतस्य हि रामस्य क्षिप्रमङ्कगतां सतीम् ।
अहं द्रक्ष्यामि सिद्धार्थां त्वां शत्रौ विनिपातिते ॥ ३० ॥

अश्रूण्यानन्दजानि त्वं वर्तयिष्यसि शोभने ।
समागम्य परिष्वक्ता तस्योरसि महोरसः ॥ ३१ ॥

अचिरान्मोक्ष्यते सीते देवि ते जघनं गताम् ।
धृतामेतां बहून्मासान्वेणीं रामो महाबलः ॥ ३२ ॥

तस्य दृष्ट्वा मुखं देवि पूर्णचन्द्रमिवोदितम् ।
मोक्ष्यसे शोकजं वारि निर्मोकमिव पन्नगी ॥ ३३ ॥

रावणं समरे हत्वा नचिरादेव मैथिलि ।
त्वया समग्रं प्रियया सुखार्हो लप्स्यते सुखम् ॥ ३४ ॥

समागता त्वं रामेण मोदिष्यसि महात्मना ।
सुवर्षेण समायुक्ता यथा सस्येन मेदिनी ॥ ३५ ॥

गिरिवरमभितोऽनुवर्तमानो
हय इव मण्डलमाशु यः करोति ।
तमिह शरणमभ्युपेहि देवि
दिवसकरं प्रभवो ह्ययं प्रजानाम् ॥ ३६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com